नं. १११ सौंदर्यलहरी

सौंदर्यलहरी नं. १५६५

२०

5966

F- 186

Complete

[illegible]



सौ ॐ श्रीगणेशाय नमः ॐ नमो वाग्देव्यै भवान्यै ॥

टी॰ ऐंवारंवारमुदारसारमितमुखः शिक्षोपरिस्थापितं.

१ ह्रांरंह्रारमुल्लूखलोपरिगतैर्हैयङ्गु.वीनंदधात् श्रा

यान्तीभुवतोऽवलोकजननीमाऽऽदायपर्यंकरेधावं

धावभिरप्रकाशितभयः पायात्स्वमायार्भकः ॥

कल्हारोत्पलकैरवाम्बुजदलन्माकन्दसन्मञ्जरीः को

कोदंडंकरपंकजेनदधतीं पुण्ड्रेक्षुदण्डोद्भवम् सौव-
र्णाङ्कुशपाशपाणिमरुणामारक्तवस्त्रावृतामालाम्बा
म्बुजसंस्थितांत्रिनयनांचन्द्रार्धचूडांभजे प्रणम्यशंक
राचार्यचरणाः स्फुरद्धृदयं आनन्दलहरीस्तोत्रं विस्फु-
पदैःऽपिलक्षये नवभवानीपक्षे नतुहरिहरविरिञ्चादि
देववृन्दमुपास्य किमितिकात्यायनीस्तुतेराः चरणामि

सौ
टी
२

निशिष्याशंकामपनिनीषुराह ॥ शिवः कल्याण
ॐ शिवः शङ्क्याशुभो यदि भवति शक्तः प्रभवितुं नैव
देवं देवो न खलु कुशलः स्पन्दितुमपि अतस्त्वामा
राध्यां हरिहरविरिञ्च्यादिभिरपि प्रणन्तुं स्तोतुं
वाकथमकृतपुण्यः प्रभवति ॥ १ ॥
रूपः सदाशिवः
अविद्यानन्तकोर्यापार्जितजन्ममरणाद्यनेक ॥

क्लेशरूपासंगलरहितत्वात् शक्ताकर्तुमःकर्तुमःन्य
थाकर्तुं शक्तया त्रिगुणात्मकप्रकृत्या अविद्यापरना
मधेययायदियुक्तःपरिच्छिन्नोभवति तदाप्रभवितुंप्र
भुत्वंविधातुंशक्तः समर्थोभवति अविद्याविच्छिन्न
स्यैवब्रह्मणोजगन्निर्माणेशक्तत्वादितिभावः नतु
स्वतः प्रयोजनाभावात्कथंतस्यसृष्ट्यादौप्रवृत्तिरित्य

मो
टी
२
3

तस्माद्वृ देवइति देव्यतिक्रीडतीति इति देवः तथाचक्री

डार्थमेव प्रवर्तते भगवान्दृष्टादौ तच्चनःप्रयोजनशून्य

इत्यभिभावः नचैवं तथाचेनयुक्तः तदास्यान्नितंचलि

तमःऽपि न कुशलः न तमः तस्यस्वतोनिर्धर्मकत्वादि

ति तदुक्तं शाक्त्याविनाशिवेसूक्ष्मेनामथामनविद्यते

इति एतेननिर्गुणस्यसृष्ट्यादिकर्तृकत्वाद्गुण।

त्रयात्मकमायानुग्रहापेक्षोक्ता इदंचवेदान्तमते अ
न्यमतेऽपि ॐरूपस्यशिवस्यभवानीरूपशक्तिसंयोगादे
वजगत्कर्तृत्वं नान्यथेत्युक्तं तेनचशिवःशिवशब्दःश
क्त्यापकारेण अकार इकारात्मकेनयदियुक्तोभवति
तदाप्रभवितुं सकार्यजगद्रूपांस्थितिंकर्तुंशक्तोभव
ति नचेदेवंदेवःस्पन्दितुमऽपि ओष्टपुटविभागमऽपि

सौ कर्तुं न शक्तः शकारवकारयोर्निःस्वरयोरुच्चारयितु
टी मशक्यत्वात् अतएव शम्भावि नाशिवेत्यनेनामथाम
४ न विद्यते इत्यत्र नामपदमनुच्चार्यमाणत्वार्थकमित्यप
रंचोपात्तं अथवा शिवःककारादिलकारान्तपंचत्रिंश
द्वर्णात्मकः शक्तयाअकारादिविसर्गान्तषोडशस्वररूप
याऽयुक्तो यदि भवति ॥ नद्यप्रभवितुं.

वेदादिरूपतयाव्यक्तीभवितुंशक्तोभवति नचेदेवंतदा
स्यान्दित्वमःऽपि नालोष्ठपुटस्यान्दमःऽपिकर्तुंनक्षमाः
नतमः तदुक्तं शारदाटीकायां विनास्वरैस्तुनान्येषां
जायतेव्यक्तिरञ्जसा शिवशक्तिमयान्याऽस्तस्माद्ध ।
र्णान्मनीषिणःइति मातृकाहृदयेऽपि ककारादितर्क
रान्तवर्णास्तेशिवरूपिणः समस्तव्यस्तरूपेणषड्विं

मौ
टी
५
5

शान्तत्वविग्रहाः अकारादिविसर्गान्तस्वराः षोडशाशा-
क्तयः नित्याः षोडशाकात्मानः परस्परसमाश्रुताः शिव
शक्तिमयावर्गाः शब्दार्थप्रतिपादकाः शिवोस्वरः
परोधीनोनस्वतन्त्रः कदाचन स्वराः स्वतन्त्राज्ञायत्तेन
शिवस्तुकदाचनेति अथवा शिवोहकारः शक्तावा
त्तृतीयवीजरूपया तेनप्रसादपरामन्त्रोद्धारः ॥

अथबिन्दुमेवचन्द्ररूपतांगतंशक्तः यद्वा शिवोबिन्दुः शा
क्त्याविसर्गेणगतेनानुत्तरमन्त्रउक्तः तदुक्तंशिवदृष्टौ
अहंबिन्दुर्विसर्गस्तुभावयोर्योगतःपरः प्रकाशपर
मार्थत्वात्स्फुरत्तालहरीयुतात् प्रकाशितोऽनुत्तरा
ख्योवर्गोवर्णेषुतत्रवसति योगिनीहृदयेऽपि शू
न्याकाराद्विसर्गान्ताद्बिन्दुप्रस्पन्दिसंविदः प्रकाश

सौ
टी
६

परमार्थत्वात्स्फुरत्तालहरीयुक्तात् प्रसरनविस्वलह
रीमात्रस्यानवयात्मकमिति एतेन शाक्तः प्रभावितुमि
त्यः पिव्याख्यातं अथवा शिवहंकारः शक्त्याप्रका
रेणेति ह्यत्र वाग्वादिनीमन्त्रउक्तः अनन्तोलङ्गले
शाम्भविद्यावाग्वादिनीमतेति विद्याप्रकाशिनीति
वचनात् अथवा चैवपंचाः लंगोहरो यथा ।

6

शिवः शिवशब्दः शक्त्या पकारेण नमः पदेन च युक्तः
शिवः शक्तिः कामइत्यादावेकारस्य भगवोबीजमा
ख्यातं नमः शक्तिरुदीरितेत्यादौ नमः पदस्य शक्ति
पदार्थत्वाप्रतिपादनात् पकारेण चतुर्थ्येकवचनं
ङे इत्यस्योक्तिः ङकारलोपात् प्रभवित्वं मन्त्ररूपेण
भीष्टादिफलमाहर्तुं नचेदेवमित्यादेः प्रतिपादक

सौ मात्रस्य मंत्ररूपभावेन तद्यत्किञ्चित्फलदानेप्यस
टी मर्थ्यशत्यर्थ्योज्ञेयः यतःशिवस्यापि सामर्थ्यं न दा भ
वती अतोहतोस्त्वां प्रणन्तुंसोढवा अकृतपुण्यो
नुपार्जितसुकृतः कथं प्रभवति समर्थो भवति किं
तु केवलं पंचब्रह्मान्तर्गतसदाशिवसेवत्वस्यापेक्षा
पितब्रह्मानुत्तरस्यापीत्याह हरिहरविरिञ्च्यादिभिरपि

विष्णुशिवब्रह्मादिभिः आराध्यां समर्चनीयामित्य-
र्थः पाशाद्यन्तराभिप्रायेण वा योजनीयमिदं पद्यं
यथा द्वितीयार्थे अतः त्वाम् आमा आराध्यामिति पदच्छे-
दः तेन शिवः शक्त्याभिन्नः परमात्मा आमा आकारेण
पाशबीजेन शक्त्या भुवनेश्वरीबीजेन हरिहरविरिञ्च्या-
दिभिः क्रौंकारेण यदिगुरू इत्यत्र यतः हरिपदेन ॥

सौ॰ ॐकारस्य हर पदेन रेफस्य विरिंचिपदेन ककारस्यो क्तं

टी॰ श्च वैपरीत्येन योजने तद्बीजलाभादिति यतः पंचद-

८ शीविद्यान्तर्गतमध्यबीजात्मकमभून्मनीबीजमूर्धेति

8 शिवइति शिवोहंकारः शाक्तासकारेणाहरिहरविरि

ञ्च्यादिभिः लकारहकारककारैश्चवैपरीत्येन यादृशु

क्तः प्रोक्तः शाक्तिपुत्रोभुवनेश्वरी प्राप्त इत्यर्थः ॥

यहा सकल श्री विद्यामंत्रमूलभूतनवार्णवसेरूमंत्रोद्वा
रोऽज्ञेयः यथा शिवोऽहंकारः शक्ता अकारेण पकारे
णच हरिहरविरिञ्चादिभिरपिदुष्कः हरिर्लकारः हरो
विन्दुः अहंविन्दुर्विसर्गस्त्वभिन्नकेः विरिञ्चिः ककार ः
आदिपदेन रेहादिस्तदाप्रभवितं नानाश्रीविद्यामन्त्रं
तामुपगन्तुंशक्तः समर्थः नचैदेवं तदास्पन्दिबमप्य

सौ
टी
५
9

मंत्रतामप्युपगतं तं नजभावः तदुक्तं ज्ञानार्णवे मूलवि
द्यां स्मृत्वा ऊं भौ फे सकलामव्यये शिवे भूमिश्चन्द्रः शिवोमा
या शक्तिः कृष्णाध्वमादनौ अर्धचन्द्रश्च बिन्दुश्च नवार्णो
मेरुरुच्यते महात्रिपुरसुन्दर्या महामेरुसमुद्भवः इति से
गोपनार्थं वाचार्यैर्ज्ञानार्णवीयक्रमेणोक्तः इति सेयं
यद्वा शिवपदेन ककारहकाररेफाः ॥

शक्तिपदेन पकारादिकारमायाबीजानि प्रभवितं पंच
दशीमन्त्रतां गमनंतं अतएव ब्रह्मोमायाभिः पुरुरूपईय
ते इतिश्रुतिर्निश्चयमेवार्थमाह यद्वा शिवो गोपाला
द्वादशाक्षरः शक्तिः पंचदशी अष्टादशाक्षरपंचदशी
भ्यां सुन्दरीगोपालमन्त्रो द्वाराभ्यामितिव्याक्रमः अथ
वाशिवशब्देनोर्ध्वमुखत्रिकोणचतुष्टयं शक्तिशब्देना

सौ० धोऽग्रत्रिकोणपंचकमुच्यते उभयं मिलित्वा श्रीच-
क्रं ज्ञेयं यदुक्तं चतुर्भिः शिवचक्रैश्च शक्तिचक्रैश्च पंच-
टी० भिः शिवशक्त्यात्मकं ज्ञेयं श्रीचक्रं शिवयोर्वपुरिति
१० प्रभवितं सृष्ट्यादिकर्तृ श्रीचक्रादेव सृष्टिस्थिति सं-
10 हृतयो भवन्तीत्यागमवित्तमाः तदुक्तं कामिके
त्वगसृङ्मांसमेदोऽस्थिधातवः शक्तिमूलकाः ॥

मज्जाशुक्रप्राणजीवधातवः शिवमूलकाः नवधात्वयं
देहो नवयोनिसमुद्भवः नवयोनिचक्रं स्वयं च करा
चिदाघाललिताङ्गरूपा क्रमविग्रहा वेणुनादसमार
म्भादकरो हि विश्वं जगदिति तन्त्रराजवचनात्क्रमसमाः
पिकान्यायनीरूपतन्मरतयापि व्याकृमैः नन्त्रमीमांस
कादिमते जगत्कर्तुरीश्वरस्याभावान्निर्विषयिणीयं तु

सौ
टी
॥

त्रिविस्याशंकापनयनार्थं तानुपहसन्ति शिव इति शी
ङ्. स्वप्ने इति धातोर्निष्पन्नमायोऽपि यद्वाऽप्यसौ सर्वत्वा
त्. शिव ईश्वरः शक्त्या शरीरेन्द्रियादियुक्तः स्यात्तदा प्र
भवितुं सृष्ट्यादिकर्तुं शक्तः स्यात्. तथा च क्षित्यादि
कं सकर्तृकं कार्यत्वाद्घटवदित्याद्यनुमानं तदा वेद
कतयाऽलं शरीरीजन्यत्वेम रणोनोक्तः नचेदेवम्

शरीरयुक्तोनचेन्नदास्यान्दितमपिनकुशलः शरीरव्यति
करेणघटादावपिनतस्यानिमित्तकारणत्वं यतोघटादि
केह्निकर्त्तकसिन्द्यपिपरास्तं ग्रतोयुक्तेस्वांमरणान्तुस्तेवं
वाग्रक्षृतत्ररणयोमीमांसकादिः कथंप्रभवतिसमर्थो
भवति ग्रांविस्मयेसम्बोधनेवा हरिहरविरिञ्च्यादिभि
रपि इन्द्रशिवब्रह्मादिभिरप्याराधनीयसमर्चनीयहे

सौ इति भगवत्सम्बोधनं प्रोक्तश्लोकेन हरिहरब्रह्मादी
टी. नामऽपि त्वत्सापेक्षतेति । हरिहरविरिञ्च्यादिभिर
१२ प्याराधनीयामित्युक्तं सा च केन प्रकारेणेत्याशंका
यामाह ॥ तनीयांसमिति ॥ ॥

तनीयांसं पांसुं तव चरणपंकेरुहभवं वि
रिञ्चिः संचिन्वन्विरचयति लोकानविकलं.

वहन्त्येनं शौरिः कथमपि सहस्रेण शिरसां हरः संक्षुभ्यैनं भजति भसितोद्धूलनविधिम् ॥ २ ॥

तनीयांसं पांसुं तव चरणपंकेरुहभवं तत्पादाम्बुजोत्थं पांसुं पंचभूतरजःकणं विरिञ्चिः ब्रह्मा संचिन्वन्नेकीकुर्वन्लोकांश्चतुर्दशभुवनानि अविकलं समस्तं विकल्परहितं यथास्यात्तथा विरचयति सृजति एवं पा

सौ सं चतुर्दशभुवनतया परिणतं शौरिर्विष्णुः शेषरूपः शि
टी रसां सहस्रेण फणानां सहस्रेण कथमपि कष्टेन वहति बि
१२ भर्ति हरः संहर्ता एनं पांसुं चतुर्दशभुवनतया परिणतं
संक्षुभ्य चूर्णीकृत्य भसितोद्धूलनविधिं भस्मस्नानं भज
ति करोति अत एव अग्निरिति भस्म मन एतानि चक्षूंषि
भस्मानीति भस्मस्नान मन्त्रेषु।

13

भूतादीनां भस्मतोक्तिः भवानीपतेस्तु चरणाश्चत्वारः
शुक्लरक्तमिश्रनिर्गुणाख्याः सत्वप्रधानः शुक्लः रजः
प्रधानो रक्तः तमःप्रधानो मिश्रः गुणातीतो निर्गुणः
शुक्लरक्तयोराज्ञावक्रं मिश्रस्य हृत्कमलं निर्गुणस्य
सहस्रदलं स्थानं शुक्लो विष्णुः रक्तो ब्रह्मा मिश्रो रुद्रः
निर्गुणः सदाशिवः तथा च रक्तचरणपंकेरुहभवं पां

सौ सुं रजोगुणं संश्रित्य विरिंचिर्लोकान्सृजति शुक्लाचरणप
टी ङ्केरुहभवं पांसुं सत्वगुणं संश्रित्य विष्णुरवति मिश्रचर
१८ णपङ्केरुहभवं पांसुं तमोगुणं संश्रित्य हरः संहरति तद्
14 क्तं दनाद्ध्येयेण भ्रूमध्यगो विधिहरी नवरक्तशुक्लौ पा
दौ रजोमलगुणौ नवसेव्यमानौ सृष्टिस्थिती वितन्वते
हृदये तनीयमद्भिः भजंस्तव हरोस्ति निरस्तविघ्नम्

त्वर्यंतवैवचरणं निरुपाधिबोधंसंज्ञा
मतं शिवपदे सततंनमामीति तत्रस
र्वत्तजडतस्याद्दूरूहतया बहुकालसा-
ध्यतया प्राज्ञसंबुद्धिपूर्निचिरजीविसा

सौ ध्यत्वादनम्राह ॥ अविद्यानामिति ॥

टी अविद्यानामःन्तास्तिमिरमिहिरोद्दीपनकरी

१५ जडानांचैतन्यस्तवकमकरन्दस्रुतिसिरा

दरिद्राणांचिन्तामणिगुणनिकाजन्मजलधौ

15

निमग्नानांदेहिनामुद्धरणेत्रवराहरूपभवती ॥ ३ ॥
तथाच त्वद्रूपात्सर्वमद्भुतमनमितिभावः अविद्या
नांविद्याधर्मप्रतिपादकंशास्त्रं तद्रहितानामन्धानांतिमि
रस्याज्ञानरूपान्धकारस्यमिहिरोज्ञानं तदुद्दीपनकरी
तत्प्रकाशिकामिहिरदीपनगरीतिकेषांचित्पाठः यत्र
द्वादशादित्या युगपदुदयंप्राप्नुवन्ति तादृशीदीपनग

सौ रीभवतीत्यर्थः जडानामचतुराणांशास्त्रीयज्ञानरहि
टी· तानांचैतन्यं ज्ञानंतेनस्तवकञ्जनरोमवस्फूर्तिसम्पर्कले
१९ नमकरन्दस्तुतिः विद्वज्जनचमत्कारथारासम्पातः न
16 धादविज्ञाणांधनरहितानांतृप्तिपासातुराणांवि·
न्तामणिगुणनिका मनोवथातिगसकलकाम
नाविथात्री जन्मजलधौ संसार सागरे।

निमग्नानां भूरविभुवराहस्य विषाणदूपादिवराहस्यदं
ष्ट्रा उद्धारकरी भवतीत्यर्थः अत्र विशेषणचतुष्टयेन
धर्मकामार्थमोक्षजनकत्वं भगवत्याः प्रतिपादितम्
धर्मस्य तत्त्वाः सज्ञानसाक्षित्वात्तत्प्रदानं प्रथमेनो
क्तं कामस्य चार्थसाध्यतया तत्प्रदानं द्वितीयेनो-
क्तं तृतीयतुर्यमोक्षदानार्थकत्वस्य स्पष्टत्वमेवेति

सौ देयं प्रथच फलदानदानद्वारावाग्भवबीजात्मकत्वं
टी भगवत्याःसूचितं तदुक्तं त्रिपुरार्णवे हृदन्यज्ञानमत्तं
१२ नाज्ञडिमानमतःपुनः अतःकामान्वितत्वेनकेवलेक
17 त्पयाविधेः वाग्भवंप्रथमंबीजंवेदानांपुरतोयतः
त्रिपुरासंज्ञयाभद्रे त्वद्रूपंविश्वविग्रहम् वाच्यवाच
कद्रूपेणव्याप्नोतिमिन्त्वैभवमिति ॥

मदन्यो दैवतगणः किं न स्पृयते इत्यत आह त्वदन्यः
(पाणिभ्यामिति ॥
त्वदन्यः पाणिभ्याम् अभयव
रदो दैवतगणस्त्वमेका नैव प्रकटितवराभीत्य
भिनया भयात्त्रातुं दातुं फलमपि च वाञ्छासमधि
कं शरण्ये लोकानां तव हि चरणावेव निपुणौ
त्वदन्यो दैवतगणः पाणिभ्यामेवाभयवरदो भय वरद

सौ मात्रमुद्राधारकस्त्वं पुनरेकाम्रकदिनवराभीत्योऽभिन
ही यो यथा तथानास्ति तवाभिनयमात्रधारणेनाऽ
१८ स्ति अपितवराभयप्रदात्वमपि तत्र हेतुमाह भयेँ
18 दिति यतोभयाज्ञातुं वाञ्छासमधिकं फलंच दातुं
तवचरणावेवनिपुणावित्यन्वयः यद्वा त्वमेवै
काम्रकदिनवराभीत्यऽभिनयासि ॥

अपि तु वरदत्वोपि दैवतगणः पाणिभ्यामभयवरदः
एतावता साम्येपि वैलक्षण्यं पतत्तोपि भगवत्या इत्याह
भयादित्यादि अथवा पाणिभ्यामभयवरददैवतगण
त्वमेकानासि अपि तु त्वमेव कीदृशीत्वं प्रकटितवरा
भीत्यभिनया तथाऽपि भयात्त्रातुं वाञ्छासमधिकं फलं
चदातुं तवचरणावेव त्वच्चरणत्वेनोपास्थितावेवनिपु

सौ रेणो समर्थावित्यन्वयः ममप्रभावः कुत्रदृष्टइत्यतआह
टी हरिरिति ॥
५ हरिस्त्वामाराध्यप्रणतजनसौभाग्यजननीं पुराना
19 रीभूत्वापुररिपुमपिक्षोभमनयत् स्मरोपित्वांनत्वार
तिनयनलेह्येनवपुषा मुनीनामप्यन्तः प्रभवति
हिमोहायमहताम् ५ ॥

प्रागमृतमन्थानान्तरं हरिर्विष्णुस्त्वां प्रणतजनसौ
भाग्यजननीमाराध्य नारीभूत्वा मोहिनीरूपं विधाय
स्मरहरमपि क्षोभं मदनाधीनतामनयत् येन स्मरो
ऽपि भस्मीकृतः स तदधीनतां त्वत्प्रसादेनैव अन्य
था असंभावितेति भावः यद्वा हे प्रणतजनसौभाग्य
जननि ई ईकाररूपां त्वामाराध्येत्यन्वयः स्मरोऽपि ने

सौ नैनैवम्प्रकारेणत्वांनत्वावपुषा शरीरेणमहतांमुनीना
दी मन्तरेवमोहायाज्ञानायप्रभवतीत्यन्वयः वपुषाकीदृ
५ शेनरतिनयनलेह्येन रतिःकामस्त्रीतन्नयनाभ्यामा-
२० स्वादनीयेन प्रतिसुन्दरेणेत्यर्थः तदुक्तं वामकेश्व
रतन्त्रे एतामेवपुराराध्यात्वाविद्यांत्रैलोक्यमोहिनीं त्रै
लोक्येमोहयामासकामारिं भगवान्हरिः कामदेवोऽपि

देवेशिमहात्रिपुरसुन्दरी समाराध्याभवल्लोकेसर्वसौ
भाग्यसुन्दरइति नैत्तिरीयश्रुतिरपि जनकोहवैदेहकः
अहोरात्रैःसमाव्रजदिति जनकपतद्विधाप्रवर्तकः विदे
हदेशेभवोवैदेहः अहोरात्रैरहोरात्रात्मकैः पंचदशात
रीमंत्रवर्णैः प्रतिपदादिपूर्णिमान्तकालात्मकैः समा
जगामतंमंत्रमाहृतवानित्ययं तदर्थः नन्वत्रकथमनारी

सौ
टी
२१
21

दृपयरहस्यं नार्यावापुरुषदृपयरहस्यमाश्चार्यजनवकास्ति
ति भवतु ऊचमत्वस्मादोपयोगः तथाच सामग्री नैता
दृशीति भावः कन्दर्पस्य तु त्रिमोहकत्वस्य सामग्री सप
त्वेव भविष्यतीत्यनत्राह धनुःपौष्पमिति ॥

धनुःपौष्पं मौर्वी मधुकरमयी पंचविशिखा
वसन्तः सामन्तो मलयमरुदायोधनरथः ॥

तथाप्येकः सर्वं हिमगिरिसुतेकामम् अपिकृपा
म् अपाङ्गात्तेलब्ध्वा जगदिदमनङ्गोविजयते ६ ॥

धनुः पौष्पं पुष्पमयं सुकुमारं नवज्रोपमम् इत्यर्थः मौर्वी
ज्यामधुकरमयी भ्रमरमयी मधुकराणामाकर्षणादि
कालेस्थैर्यमेवनोपपद्यते विशिखाः बाणाः पंचैव न
त्व् अधिकाः वसन्तपन्तः कदाचित्कः सामन्तः महायद

सौ हिनोपि मलयमरुदतिरणानिलोमन्दगमनः श्रायोथ
टी नरथ्यः पुहमाथनरथः स्वयमभ्येकोहितीयश्चेनरसहा
२२ यरहितोनङ्गः शारीरेणापिशून्यः तथापि हे हिमगि
२२ रिसुते तेतवापाङ्गात्तेत्रप्रान्तात्कामप्यनिर्वचनीयांकृ
पांलब्ध्वा इदंसर्वमेवयात्किंचित्जगत्संसारवर्तिप्राणिग्रस
मूहंविजयते स्वीकरोतीत्यर्थः ॥ ८ ॥

भगवतीस्वरूपमाह ॥ क्वणदिति ॥

क्वणत्कांचीदामा करिकलभकुम्भस्तननता परि

क्षीणा मध्ये परिणतशरच्चन्द्रवदना धनुर्बाणा

न्पाशं सृणिमपि दधाना करतलैः पुरस्तादास्तांनः

पुरमथितुराहोपुरुषिका ॥ ७ ॥

क्वणत्क्षुद्रघण्टिकाकांचीदाम तद्वत्कटिकास्तवक यस्या

सौ टी २१ सा तथा करिकलभः करिशावकः तत्कुम्भाविव स्तन
भरो यस्यास्सा करिशब्दश्चात्रोपरञ्जकैः करिप्रकंप्र
काशं लभते इति करिकलभः करिश्रेष्ठ इति केचित्
मध्ये उदरे परिक्षीणा कृशा परिणतः परिपूर्णः शा
रत्कालीनश्चन्द्रस्तद्वदङ्कं मुखं यस्यास्सा तथा करत
लैः धनुः कोदण्डं बाणान् पाशान् ॥

23

पाशं वज्रविशेषः सृणिमङ्कुशं दधाना धारयन्ती नो
स्माकं पुरस्तादग्रे आस्तां तिष्ठतु कीदृशी पुरमथितुराः
हो पुरुषिका आहो पुरुषोहमित्यभिमानरूपा आहो
पुरुषिकादर्पो यस्यात्मभावनात्मनि इत्यमरः । अत्र
पाशायुधयोरूर्ध्वाधोवामकरयोर्ध्यानं अङ्कुशबाण
योः ऊर्ध्वाधोदक्षिणकरयोर्ध्यानं केचित् दक्षिणोर्ध्व

सौ करेपाशंवामेचोर्ध्वकरेऽङ्कुशं धाक्षीनामिधाने ग्रन्थयन्त्र

टी रैतत्त्वंवाणागरक्तकमलनीलकमलकल्हारकैरवसह

२४ कारमञ्जरीरूपास्तन्त्रराजादावुक्ताः अङ्कुशंनानारत्न

24 खचितसुवर्णमयंपाशोरक्तपट्टसूत्रनिर्मितइति ॥

स्वरूपमुक्त्वास्यास्थानंनिरूपयति ॥ सुधासिन्धोरिति ।

सुधासिन्धोर्मध्येसुरविटपिवाटीपरिवृते,

मणिद्वीपेनीपो पवनवति चिन्तामणिगृहे शिवा
कारेमञ्चे परमशिवपर्यङ्कनिलयां भजन्ति त्वां धन्या
कतिचनचिदानन्दलहरीम् ॥ ८ ॥

सुधासिन्धोः अमृताम्बुधेर्मध्ये सुरविटपिनां कल्पवृक्षा
णांयावाटी तया परिवृते वेष्टिते मणिद्वीपे नवरत्नरचित
द्वीपे नीपोपवनवति कदम्बोपवनवति परमरमणीये

सौ न्तामणिगृहे चिन्तामणिरत्नरचितकुट्टिमसम्भादित्रि·
टी· क्रमन्दिरे शवपवपर्यङ्काकारे शुभ्रे शिवानां ब्रह्मवि·
२५ ष्णुरुद्रेशानानामाकारेण ये ताद्दशे मञ्चे खट्वारूपे पर
25 मशिवः सदाशिवपवपर्यङ्कः कशिपुतया स्थितः
तस्मिन्निलयो वसथानं यस्यास्तां ॥ ब्रह्मविष्णुरुद्र
रुद्रश्च ईश्वरश्च सदाशिवः एते पंचमहाप्रेताः ॥

पादमूलेव्यवस्थिता इतिवचनात् तदुक्तं रुद्रयामले

यस्मात्पश्चिमंजन्मस्वयंयोनमहेश्वरः नतस्माप्नोतिप

रमांदशपंचात्तरीमिमामिति एतादृशींत्वांकतिचन

धन्याःपश्चिमजन्मानःस्मरंति कीदृशींविदानन्दलह

रींविज्ञानस्वरवतरंगात्मिकामित्यर्थः रहस्यान्तरंतु

गुरुमुखादवगन्तव्यं क्वणत्कांचीत्यादिनास्थूलं

सौ ध्यानं चिदानन्दलहरीमित्यनेन परमं ध्यानमुक्त्वास्थू
टी लं ध्यानमाह महीमिति ॥ महीं मूलाधारे कम
२९ पि मणिपूरे हुतवहं स्थितं स्वाधिष्ठाने हृदि मरु
26 तमाकाशमुपरि मनोऽपि भ्रूमध्ये सकलमपि
भित्त्वा कुलपथं सहस्रारे पद्मे सह रहसि पत्या विहरसि ॥
मूलाधारे चतुर्दले महीं पृथ्वीं स्वाधिष्ठाने (९ ॥

कंजलंमणिपूरेनाभिचक्रेस्थितंअनवहं स्वाधिष्ठा
नमणिपूरयोस्संज्ञाव्यत्ययः प्रागुक्तमनेनेति वा
स्वघनाहतेमरुतंवायुं उपरिकण्ठेविशुद्धिचक्रे
आकाशंभ्रूमध्येआज्ञाचक्रेमनोन्तःकरणं एवंस
कलमपिकुलपथंषट्चक्रंभित्वा सहस्त्रारेद्वादशा
न्तेकैलाससंज्ञकेपत्याकान्तेनशिवेनसहरहसि

मो प्रकान्तेविहवसीत्यर्थः यदुक्तं सिद्धसोपाने कु
टी ण्डलिन्यामहीभेदे योगीत्यजति मेदिनीं सलिल
२० स्थानभेदेनजलेचरति योगवित् वह्निभेदेजल
मिव स्पृशत्यः ग्निंज्वलाच्छिखं मरुद्भेदेशीघ्रगति
र्यातिकोशघातंतरगात् व्योमभेदेखेविचरतिमनो
भेदेमनोगतिः यत्रकामयतेतत्रयातिलोकत्रयेऽपिच
२८

संयोजयन्शिवपदे शिवपदप्रजायते कर्त्ता हर्त्ता च सर्वत्र
स्वतास्वतन्त्र इति सिद्धविशेषोपक्रमः उण्डलि
नीरूपापित्वमेवेति उण्डलिन्यास्तावद्भूमिकात्रयम्
तत्रैकोनीयभूमिकामहीमित्यादिनोक्ता अन्वयभूमिकां
प्रत्याहृतिभूमिकां चाह ॥ सुधाधारासारैश्चरण
युगलान्तर्विगलितैः प्रपञ्चं सिञ्चन्ती पुनरपि रसा

सो आयमहसा अवाप्यस्वां भूमिं भुजगनिभमध्युष्टव
टी॰ लयं स्वमात्मानं कृत्वा स्वपिषि कुलकुण्डकुहरिणि ॥ ९ ॥

॥ १० ॥

१८

सुधाधारासारैश्चरणयुगलान्तर्विगलितैः प्रपञ्चं सिञ्चन्ती पुनरपि रसाम्नायमहसः ।

सुधाधारासारैरिति सुधाधारासारैः चरणयुगलान्तर्विगलितैः भ्रूमध्यगतसहस्रारकवराणमध्यमार्गतो निःष्पन्दमानैः प्रपंचमानस्याप्यानादि ॥

षट्चक्रनूपंकुलपद्मं सिंचन्तीत्यनेनान्वयभूमिकोक्ता
मत्याहन्निभूमिकामाह उनरपीति वसाम्नायाः षडा
म्नायाः पूर्वदक्षिणपश्चिमोत्तरोर्ध्वानुत्तराख्याः शांकरा
म्नायाः स्थानानि पार्थिवाप्यानलवायव्यनाभसमा
नसाः शांभवाम्नायाः एतेषां स्थानान्यनुत्तरादिक्रमेण
भूमध्यादि मानसादिक्रमेण वा एतेषां सहस्रा एषां

सौ षस्मां प्रकाशेनतेजसास्वां भूमिं मूलाधारमवाप्यलब्ध्वा
टी॰ स्वात्मानंस्वस्वरूपंभुजगनिभंसर्पाकारमध्युष्टवलयंसा
२१ र्धत्रिवलयंकृत्वाकुलकुण्डेमूलाधारान्तर्गतचतुर्दल
21 पद्मकर्णिकामध्यवर्तित्रिकोणेकुहरिणि कुहरं
रन्ध्रविशेषस्तद्वति शुभ्रस्थलेस्वापिषि शेषे तदङ्के मू
लादिब्रह्मरन्ध्रान्तरकोरगतन्तुसन्निभाम् ॥

कुलकुण्डलिनीं नित्यां विद्युद्वल्लीसहस्रकं मृणालि
कुलकाङ्कारसदलसरनिनादिनीं उन्नीयोनीयचक्रेषु
क्रमान्द्यान्दितवैभवां ॥ अनुत्तरपदंगत्वापीत्वाकुल
परामृतं अकुलात्कुलकं भूयः कुलादकुलकं पुनः
एवंमांमन्तरीध्यायेत्तत्सध्यानंप्रकाशितमिति ॥
अधुनाश्रीचक्रमुद्धरति ॥ १ ॥

सौ चतुर्भिः श्रीकण्ठैः शिवयुवतिभिः पंचभिरथः
टी प्रभिन्नाभिः शंभोः नवभिरथमूलप्रकृतिभिः
३० त्रयश्चत्वारिंशद्वसुदलकलाश्रत्रिवलय त्रिरे
खाभिः सार्धं नवभवनकोणाः परिणताः ॥

श्रीकंठैः शिवैः ऊर्ध्वमुखत्रिकोणैश्चतुर्भिश्चतसंख्याकैः ।

तथा शिवयुवतिभिरधोमुखत्रिकोणैः पंचभिः पंचसं-
ख्याकैः अधःप्रभिन्नाभिः सम्बद्धाभिरित्यनेनप्रकारेण शं-
भोर्नवमूलप्रकृतिभिः श्रीचक्रकारणभूताभिः नवयोनि-
भिः यद्वा मूलप्रकृतिभिः प्रपंचस्य मूलकारणैः यदुक्तं
कामिके त्वगसृङ्मांसमेदोऽस्थिधातवः शक्तिमूलकाः
मज्जाशुक्रप्राणजीवधातवः शिवमूलकाः नवधातरयं

सौ देहो नवयोनिसमुद्भव इति नवयोनिः श्रीचक्रं त्रयश्चत्वा
टी रिंशत्कोणाः वसुदलमष्टदलं कलाश्रं षोडशदलं त्रि
३१ वलयं भूपुरत्रयं त्रिरेखाभूविम्बरेखात्रयरूपभिः सार्धं त
३१ वभुवनकोणाः परिणताः तच्चक्रं विन्दुत्रिकोणवसु
कोणदशारयुग्ममन्वस्रनागदलसंगतषोडशारं भूपुर
यं च धरणीसदनत्रयं च श्री चक्रराजमुदितं परदेवताया

इति प्रस्तारवशात्त्रिकोणस्यादिस्थितकोणद्वयकोण
मार्गतत्वाद्विचत्वारिंशात्वं अस्योद्धारक्रमस्तु हृतंकृते
ष्टमानेनसूत्रंपूर्वापरायतं विन्यस्यविभजेदष्टचत्वारिं·
शद्विभागतः षष्ठेषष्ठेपंचमेचतृतीये ऽप्यतृतीयके
चतुर्थेच तृतीयेच षष्ठेषष्ठांचकेक्रमतः विभज्यनववि
ष्ठानितेषुसूत्राणिपातयेत् नवयाम्योत्तरायाणिते

सौ षाड्भयथायतः प्राघन्टतीयतुर्याणां भवपंचमषष्ठ
टी यो अष्टमेशुनयोर्विह्वानशिभान्दुकलांशकान् दुवाए
३२ ह्याष्टवेदाग्निसंख्याशान्मानयेत्क्रमात् शनिमध्येरवे
32 रन्ते चन्द्रान्ते केतुमध्यतः मङ्गलान्ते हूतमध्ये बुधांते
राहुमध्यतः शुरोरन्ते भौममध्ये शुक्रान्तः सोममध्यतः
शान्यन्ते बुधमध्ये तु राक्रान्ते रविमध्यतः केत्वंते बुधमध्ये तु

हृजयेत्क्रमतोऽथ: मध्यबाह्यिः स्थितं च्यश्रमष्टाहि
दशवाह्यकं चतुर्दशकलोपेतं श्री चक्रंज्ञायतेप
रं तद्बहिर्वसुपत्रं बहिःषोडशारं चतद्बहिः हृत्त्रिवयसं
शोभितंत्रिरेखान्वितभूरद्वारात् स्थितामनिलयंद्वारत्व
चतुष्टयसुशोभितं सर्वतेजोमयंदिव्यंसोमसूर्या
नलात्मकामिति ॥ १ ॥ हेतुर्हिनगिरिक

सौ
टी
३३

त्वदीयं सौन्दर्यं तुहिनगिरिकन्ये तुलयितुं
कवीन्द्राः कल्पन्ते कथमपि विरिंचिप्रभृतयः
यदालोकौत्सुक्यादमरललना यान्ति मनसा
तपोभिः दुष्प्रापामपि गिरिशसायुज्यपदवी ॥१२॥

हे त्वदीयं सौन्दर्यं तुलयितुं उपमानोपमेयभावेन वर्ण-
यितुं विरिञ्चिप्रभृतयो ब्रह्मादयः कवीन्द्राः कथमपि

कल्पान्तेसाहस्रपापनयाद्रूपमानाभावादितिभावः
अमरललनादेवाङ्गनाः अमराणांललनेविलासोपे
यांतेसाथका इतिवा ओमस्तुकारादोन्करणाद्यस्मोत्त्वयं·
मनसाः लोकध्यानवानपोभिर्दुष्प्रापांगिरिशमस्तु·
ज्ञपदंवीयान्ति आप्नुवन्तीत्यर्थः एतेनध्यानसंभो
गमोत्तमदत्तमत्तुलंभवति ॥२॥ वर्षीयांसंहृदंनय

श्लो ३४

नवंवर्षीयांसनयनविरसंनर्मसज्जं न
वापाङ्गालोके पतितमनुधावन्ति शतशः
गलद्वेणीबन्धाः उचकलशा विस्रस्तसिचया
हठाद्भ्रस्यत्काञ्च्यो विगलितदुकूला युवतयः ॥

नविरसंकुरूपं नर्मसकामक्रीडासज्जं मनभिज्ञं पता
दृशमपिनंरमनुषंनवापाङ्गालोके अपाङ्गः न.

यदालोकनं नस्मितिनं नड्डाजनं शात्रशेगुवत
योद्भावन्ति कीदृशाः गलद्धेरगीवन्धाः विगलित
कवरीभाराः क्षुचकलषाहिस्तस्त्राभ्रष्टाः सिचयाः
कञ्चुलिकायासांताः हठात्रिष्क्रावरणात्रुसत्कांच्याः
छिन्नाः त्रुड्दघटिकायामालाः विगलितडूकूलाःप्र
छोत्तरीया इत्यर्थः ५८ ॥ अथरशिमचक्रं स्तूयते ।

सौ क्षितौ मूलाधारे षट्पंचाशद्दले पार्थिवतत्वानि च

टी क्षितौ षट्पंचाशाद्द्विसमधिकपंचाशदुदके

३५ हुताशे द्वाषष्टिश्चतुरऽधिकपंचाशदनिले

35

दिवि द्विःषड्त्रिंशन्मनसि च चतुष्षष्टिरिति ये

मयूखास्तेषामप्युपरि तव पादाम्बुजयुगं १४

पंचतन्मात्राणि पंचभूतानि पंचज्ञानेन्द्रियाणि पञ्च

कर्मेन्द्रियाणि अन्तःकरणचतुष्टयं कालः प्रकृति
पुरुषमहत्तत्त्वादीति अष्टाविंशति शिवशक्तिसंबं
धभेदेनहिविध्यतितेनषट्पंचाशत् ५६ अष्टाविं
शति शिवशक्तिरूपाणां नामान्यग्रे वक्ष्यन्ते उदकेम
णिपूरेद्विपंचाशद्दलेअप्यतत्त्वानिषड्विंशतिःपंच
भूतानिपंच तन्मात्राणि पंचज्ञानेन्द्रियाणिपंचक

सौ मैन्द्रियाणि षड्विंशातेषां मनश्रतिशेवशक्तिभेदाद्द्वि

टी पंचाशत् ५२ ज्ञताशेस्वाधिष्ठानेद्वाषष्टिदलेतैजस

३९ तत्वानिपकत्रिंशात् शिवशक्त्योर्विभागेद्वाषष्टिः ६२

अनिलेअनाहतेचतुष्पंचाशद्दलेवायव्यतत्वानि

सप्तविंशति महत्तत्वान्तपार्थिव तत्वानिशिवश

क्तिविभागेनचतुष्पञ्चाशत् ॥ ५४

36

दिविविशुद्धिचक्रेहिसमनिदलेव्योमतत्त्वानिषड्विं
शत् शिवशक्तिसदाशिवेश्वरशुद्धविद्यामायाक
लाकालरागनियतिपुरुषप्रकृत्यहंकारबुद्धिम
नोज्ञानेन्द्रियकर्मेंद्रियशब्दस्पर्शरूपरसगंध पंच
भूतानीतिशिवशक्तिविभागेनह्रासमतिः १२
मनस्याज्ञाचक्रेचतुःषष्टिदलेमानसतत्त्वानिद्वात्रिं

मो
टी
५२

ष्ठात् तथाहि परावतर्विपा परापश्यंतीमध्यमा
वैखरीति श्रुष्ठापंचधा कर्तृकारयितृमपकर्तृश
तिकर्तृश्रद्वामितृमिति ज्ञानंहिविधंसालम्बनंसा
लम्बनंनिविधं ज्ञातृज्ञेयज्ञानमिश्रूपेण निरालम्ब
नमपि ॥ त्वमऽहं त्वदीयंमदीयमिति च
तुर्विधं क्रियासमथा श्रृंशृतंसाध्यायोजपः

ष्ठानपोदानमिति कुण्डलिनीभूमिकाभेदेन चतुर्विधा
तद्रूपोलयः प्रत्याहृतिर्विश्रान्तिरिति मातृकाष्टधा वर्गा
ष्टभेदात् एवं द्वात्रिंशद्भिर्वर्णशक्तिविभागेन चतुःषष्टिः ६४
एवं पार्थिवादितत्त्वरूपाः षष्ठ्युत्तरत्रिंशतं मरीचयः शांभ·
वाः तदुक्तं कुब्जिकानन्दे आद्योपरा चतुर्धा स्याद्द्वितीये·
च्छापि पंचधा तृतीयं द्विविधं ज्ञानं चतुर्थी समया क्रिया।

सौ
टी
३८

38

पंचमीकुण्डलिनीह्रींह्रींच्छष्टीसान्मातृकाष्टधा पर
तोजायतेहंसा साचव्योमगतिःस्मृता षड्विंशत्यावि
काःप्रोक्ताःकण्ठस्थानसमाश्रयः षष्ठाज्जायतेज्ञा
नान्साचवागोरथीश्वरी सप्तविंशतिरश्मीनांपतिस्मा
नाहृताश्रया ज्ञानादभूक्तियाव्यक्ता साचवाक्रीस्मृ
तातथा एकत्रिंशद्रश्मिपतिःस्वाधिष्ठानेसमाश्रिता ।

क्रियातः कुण्डलीचक्रासास्यात्सलिलनायिकास
प्तविंशतिरश्मीनां मणिपूरसमाश्रया कुण्डल्यामा
र्त्तकाज्ञानासातित्तेरीघरीमता अष्टाविंशतिरश्मीना
मधिपाधारमाऽग्निना शिवशक्तिविभागेन द्विविधा
शाम्भवक्रिया षष्ट्युत्तरंचत्रिशतमेवं शांभुमरीचयः
प्रादिशक्तिभिः षड्भिर्नायकैः सहिताः पुरः द्विसप्त

मो न्यधिकजीर्णिशतान्याहुर्मनीषिणः येषांस्मरणमा
टी त्रेणजीवन्मुक्तोमहींचरेत् सर्वेषांस्मरणाच्छक्तः ष
३९ हृत्सुचैकमपिस्मरेत् येषांस्मृतिमतोलोकाःपापहा :
पूतनात्मनः लक्ष्मीवान् ध्यानतोजीवन्मुक्तोवाशिवमं
डलेवसेदिति तथानैव शिवस्यनिष्कपंचस्यपक्ष्मा
ष्टकरीपरा शाह्वानूचेपराज्ञाता पंचानांमातृरूपिणी

अन्वयानांमार्गयोगात्मेकाघोदाप्रजायते पराचेष्टा
तयाज्ञानाक्रियाकुण्डलिनीतिच मातृकाचाष्टधाप्रो
क्ताापराभेदस्ततःस्मृतः ॐकुण्डलिनीमातृकाभ्यांघोदा
भिर्नामसूचकः नानाविधंसुविततंतन्त्रमेततव
उन्वयं उत्पन्नंशंभुवंपश्चाज्जगदेतच्चराचरमिति॥
अथपार्थिवादिचक्रेश्वरीणांनामानि उड्डीश्वरो

मो उड्डीश्वरी जलेश्वरो जलेश्वरी पूर्णेश्वरः पूर्णेश्वरी
टी· कामेश्वरः कामेश्वरी श्रीकण्ठो गगना अनन्तः स्व
८० दसा शंकरो मतिः पिंगलः पातालदेवी नादाख्यो
नादा आनन्दो डाकिनी आलस्यानन्दो राकिनी म
हानन्दो लाकिनी योगपः काकिनी अतीतः शाकि
नी परो हाकिनी आधारेशो रक्षा चक्रेशश्चण्डी अंशिनी

शःकराला मदद्रेशोमदोत्कृष्णा अनादिविमलोमा
तंगी सर्वज्ञविमलःपुलिन्दी योगविमलःशार्वरी सि
द्धविमलोवायसी समयविमलःज्वालालिका नेत्रेशः
क्षान्तिः उड्डीशोलज्जा षष्ठीशः ज्वलेश्वरी चर्यानाथीश :
ज्वलज्ञा ५९ पतेपार्थिवरथ्यरश्मयः मूलाधारेषट्पं
चाशाहत्लंकमलंविचिन्त्य तत्कर्णिकायामःश्रेवत्य·

सौ मारैगेणशिवो सम्पूज्य दलेषुरथ वज्रमयः शून्याः शिवा
टी नन्दनाथ श्री पादुकां पूजयामि इति योज्यं शक्ति-
४। स्वामिपादुकां च पूजयामीति योज्यं एवं सर्वचक्रेषु
४१ अथवा मूर्त्तिषट्कोणं विचिन्त्य पश्चिमादितो वशमी
स्सम्पूजयेद्यत्नादष्टाविंशतिकक्रमात् चतुष्कं पंचकं
षट्कं चतुष्कं पंचकं पुनः चतुष्कमिति संभिन्नाः

क्रमात्पार्थिवरश्मयः भूमावपिविलिख्यमध्यनो श्र
घहृदिपंचाशद्रश्मयोमणिप्रदेशांभवक्रमेणस्वाधिष्ठान
मणिपूरयोर्वंत्ययः तेच सद्योजातोमाया वामदेवः
श्रीः श्रघोरःपद्मा तत्पुरुषोम्बिका श्रनन्तोनिर्वृत्तिः
श्रम्यःप्रतिष्ठा जनाश्रितोविद्या श्रचिन्त्यःशान्ता श
शिवोत्सवराउमा नीत्रोगंगा माणिवाहः सरस्वती श्रत्र

मो वाह्नोविद्याकमलातेजोधीशः पार्वती विघ्नघावामे॰
टी श्वरः विश्वीचन्द्रविघ्नेश्वरः सुकमलःउमा गन्धेश्वरो
५२ मन्मथा हृस्मेश्वरः श्रीः श्रीकंठेलया अनन्तःसती
श्रीः शंकरोमेखला पिंगलोयशोवती संख्याख्यो
हंसनादा परिदिव्योघोवामा मारदिव्योज्येष्ठा पी
ठेघोरौद्री ॥ सर्वेश्वरः सर्वमयी ॥

पत्रेष्वाद्यन्वरश्मयोमातृणि द्विषट्दलेचतुष्कादिक्रमेण

ष्टुताः तदङ्कं पञ्चवाह्निन्यां चतुष्कंचचतुष्कं ष्टुयषट्त्रि पिव

ष्ककं पंचकंत्रिकमित्येवमभिन्नाज्जलमरीचयइति तन्त्रा

न्तरेह्यपिपंचाशद्दलसंचिन्त्य तत्रषट्जनतुकं अथपीतेन

स्तत्रमयः परापरश्चंडेश्वरी परमश्चन्द्रमती तत्परो

गुह्यकाली अपरः संस्कर्त्री चिदानन्दस्त्वीतस्ता अथो

सौ अघोरोगम्भा समरसोरमा तुलितःसया स्वच्छःस
टी० र्गा भूतेश्वरःशाम्बा आनन्दोडाकिनी आलस्यः रत्नडा
७३ किनी प्रभानन्दश्चडाकिनी योगानन्दःपद्मडाकि
नी कुलकौलेश्वरःपावनी कुलीश्वरःसमया श्रीकं
43 ठःकामा अनन्तोदेवनी शंकरोज्वाला पिंगलःकरा
ला महाख्या कालिका कालरात्रिगुरुःपरा सिद्धगुरुः

शंगान्यतीता स्पर्शागुरुःशान्ता शिवगुरुविद्या मेलगुरु :

प्रतिष्ठा समयगुरुःनिवृत्तिः एतेस्वाधिष्ठानेदशदलेप

श्चिमादिनवदलेषुषट्क्रमेणदशमदलेष्टकेपूजयेत्प

श्चवाद्धिर्ध्यांतु पंचकं पंचकं षट्कं चतुष्कंत्र्यकेपुनः

षट्कंचेति क्रमाद्भिन्नाश्लेजसाः क्रमरश्मयइतिषट्

कोणपूजनमुक्तं अथवायव्यमरीचयः खगेश्वरोभद्रा

सौ क्रूर्मेश्चाधारा मेषाशोका मेनोमल्ली ज्ञानोविमला
महानन्दः शार्वरी नीद्रोलीला प्रियः ऊगुदा कालि॰
टी कोमेनकी डमरोडाकिनी रामोराकिनी लोमालाकि
८४ नी कामदः काकिनी समयः शाकिनी ह्रामरोह्राकि
44 नी श्राधारेशोराका चक्रेशोविभुः ऊरः ऊलाः समुद्देश
कुब्जिका हृदीशः कामकला गिरीशः ॥

कुटिलदीधितिका शिखीशः कर्बुराः वर्मीबडनपाः

श्रम्बेशोमहत्तश्रीश्रणगुरूर्मंगला पत्रादिगुरुः केसटा

श्रुगुरुर्गमा पत्रेनाहूतेहादशदले पश्चिमादितः पू

ज्याः तृतीयषष्ठिनवदलेषट् षट् अन्येषु चतुष्कं च

तुष्कं पश्चवाहिन्या चतुष्कं पंचकं षट्कं चतुष्कं पं

चकं त्रिकं इतिक्रमेणाभिन्नाः सर्वायवीयामरीचयश्च ते

मौ षट्कोणभूजनमुक्तं अवनाभमा: हृदय: लौकिकी
टी थर:कर्ता भोगोविशेषी भयोयोगिनी हंस:ब्रह्मसा
९५ रा शार्वः शार्वरी इभः कालिका रसमुष्टखंडाली मो
ह: अघोरेशी मनोभवः हेला शोकोमहारक्ता ज्ञान
शुम्रः जम्भिका खरः डाकिनी ज्वलनोराकिनी महा
ज्वलोलाकिनी भियोज्वलःकाकिनी नैनःशाकिनी,

मूर्धाकोह्याकिनी वाग्रः पापघ्नीकुलः सिंहाः संहारः कु
लाम्बिका विम्बदःकामा कौटिलः कूर्ममाननागालवःकं
काली व्योमव्योमा घसनेनादा खेचरोमहादेवी बा
कुलोमहन्तुरी लानःकुलिनी कुलातीतः कुलेशी
ब्रजः इन्धिका मननोदीपिकारोप्पः नीचिका शेषः
मोदिका परमःपरा परःचित् पतेविशुद्धोषोडशदले

मै ग्राघन्तयोः षट्कंषट्कं अन्येषु चतुष्कं चतुष्कं पञ्च
टी वाह्नित्यो षट्षट्कं पुनः षट्कं षट्कं षट्कं पुनश्चतत
४९ इतिक्रमात्समुद्दिष्टानाभसादिव्यरश्मयइति षट्कोणे
46 पुनश्चक्रं प्रथमानसरश्मयः परःपरा भरः भ्रमरी
चित्तंचित्परा महामायः महामायापरा निरोधः निरो
धपराशक्तिपरःशक्तिः इच्छापरःइच्छा सृष्टिपरः ॥

स्मृतिःज्ञानंज्ञानपरः सत्यःसती असत् असत्यपरा स
दसत् सदसदतीता क्रियःक्रियापरा आत्माआत्माप
रा इंद्रियाश्रयः इंद्रियाश्रयपरा गोचरः गोचरपरा॰
लोकख्यालोकख्यपरा दैवतं दैवतपरा संवित्
संवित्परा कुण्डलिनी कुण्डलिनीपरा सौषुम्नः सौषु
म्नपरा प्राणसूत्रः प्राणसूत्रपरा स्पन्दःस्पन्दपरा

सौ मातृका मातृकापरा स्वरोद्भवः स्वरोद्भवपरा संयोगजः
संयोगजपरा मन्त्रविग्रहः मन्त्रविग्रहपरा एतेष्वाज्ञायां
टी द्विदलेष्वस्याः चतुष्कचतुष्टयं वामदले चतुष्कचतुष्टयं
४७ दक्षिणे पश्चवाहिन्यां चतुष्कं पंचकंचैव चतुष्कं समं
47 कंपुनः चतुष्कमष्टकंचेति क्रमान्मानसरश्मयः ॥

इति षट्कोणसृजनमुक्तमिति ॥

पञ्चवाहिन्यास्तुक्तानि दशमिनामानि मिथुनमालायांवे
तेषांनामान्तराण्युक्तानि यथा त्रिपुरसुन्दरी त्रिपुरसु
न्दरः हृदयदेवीदेवः शिरोदेवीशिरोदेवःशिखादेवी
शिखादेवः कवचदेवी कवचदेवः नेत्रदेवीनेत्रदेवः
अस्त्रदेवी अस्त्रदेवः कामेश्वरी कामेश्वरः भगमालि
नीभगमाली नित्यक्लिन्ना नित्यक्लिन्नः भेरुण्डा भेरु

सौ एउः वक्त्रिवासिनी वक्त्रिवासी महावज्रेश्वरी महाव
टी ज्रेश्वरः शिवाहूती शिवाहूतः त्वरितात्वरितः कुलसु
४८ न्दरी कुलसुन्दरः नित्यानित्यः नीलपताकीनीलपता
कः विजया विजयः सर्वमंगला सर्वमंगलः ज्वाला
48 मालिनी ज्वालामाली विचित्रा विचित्रः महानित्या
महानित्यः परमेश्वरी परमेश्वरः ॥

सिद्धेशमयी सिद्धेशमयः षष्ठेशमयी षष्ठेशमयः
उड्डीशमयी उड्डीशमयः चर्यानाथमयी चर्यानाथमयः
पत्नेपार्थिवश्रमयः प्रथाप्यवशमयः लोपामुद्रमयी
लोपामुद्रमयः अगस्त्यमयी अगस्त्यमयः कालताप-
नमयी कालतापनमयः धर्माचार्यमयी धर्माचार्यम
यः मुक्तकेशेश्वरमयी मुक्तकेशेश्वरमयः दीपकला

सौ नाथमयीदीपकलानाथमयः विम्बदेवमयी विम्ब
टी. देवमयः प्रभाकरदेवमयी प्रभाकरदेवमयः तेजो
४९ देवमयीतेजोदेवमयः कल्याणदेवमयी कल्याण
देवमयः मनोदेवमयी मनोदेवमयः वास्तदेवमयी
वास्तदेवमयः रत्नदेवमयी रत्नदेवमयः रामानं-
न्दमयः ॥ अणिमासिद्धिः ॥

अणिमासिद्धः लघिमासिद्धिः लघिमासिद्धः महिमा
सिद्धिः महिमासिद्धः ईशित्वसिद्धिः ईशित्वसिद्धः व
शित्वसिद्धिः वशित्वसिद्धः प्राकाम्यसिद्धिःप्राकाम्य
सिद्धः भुक्तिसिद्धिः भुक्तिसिद्धः इच्छासिद्धिः इच्छासि
द्धः प्राप्तिसिद्धिः प्राप्तिसिद्धः सर्वकामसिद्धिः सर्वका
मसिद्धः ब्राह्मीब्रह्मा माहेश्वरी माहेश्वर असितांगभैरव

सौ प्रमथः अष्टैश्वर्यसरप्रमथः कौमारी कौमारः वैष्णवी
री विष्णुः वाराही वाराहः माहेन्द्री महेन्द्रः चामुण्डा चामु
५० ण्डः महालक्ष्मी महालक्ष्म्या सर्वसंक्षोभिणी सर्वसंक्षो
भनः सर्वविद्राविणी सर्वविद्रावणः सर्वाकर्षिणी
50.
सर्वाकर्षणः सर्ववशीकरणी सर्ववशीकरणः स
र्वोन्मादिनी सर्वोन्मादनः सर्वमहाङ्कुशा.

सर्वमहांकुशा: सर्वखेचरी सर्वखेचर: सर्ववीजा सर्व
वीज: सर्वयोनि: सर्वयोनि: सर्वत्रिखण्डासर्वत्रिखंड:
त्रैलोक्यसंमोहनचक्रस्वामिनी त्रैलोक्यसंमोहनचक्र
स्वामी प्रकटयोगिनी प्रकटयोगी कामाकर्षिणी॰
कामाकर्षण: बुद्ध्याकर्षिणीबुद्ध्याकर्षण: अहंका
राकर्षिणी अहंकाराकर्षण: शब्दाकर्षिणीशब्दक

सौ
टी
५।
51

र्षणः स्पर्शाकर्षिणीस्पर्शाकर्षणः रूपाकर्षिणीरू
पाकर्षणः रसाकर्षिणीरसाकर्षणः गन्धाकर्षि॰
णीरसाकर्षणः चित्ताकर्षिणी चित्ताकर्षणः धैर्या
कर्षिणीधैर्याकर्षणः स्मृत्याकर्षिणी स्मृत्याकर्ष
णः नामाकर्षिणी नामाकर्षणः बीजाकर्षिणीबी
जाकर्षणः इतितैजसरश्मयः अथवायव्यमरीचयः

आत्माकर्षिणी आत्माकर्षणः अमृताकर्षिणी अमृ
ताकर्षणः शरीराकर्षिणी शरीराकर्षणः सर्वाशा
परिपूरकचक्रस्वामिनी सर्वाशापरिपूरकचक्रस्वामी
गुप्तयोगिनी गुप्तयोगी अनङ्गकुसुमा अनङ्गकुसुमः
अनङ्गमेखला अनङ्गमेखलः अनङ्गमदना अनङ्गम
दनः अनङ्गमदनातुरः अनङ्गमदनातुरः अनङ्गरे

सौ एवा अनंगरवः अनङ्गवेगिनी अनङ्गवेगः अनंगाङ्कुशा
ही अनंगाङ्कुशः अनङ्गमालिनी अनङ्गमाली सर्वसं-
५२ क्षोभनचक्रस्वामिनी सर्वसंक्षोभनचक्रस्वामी गुप्ततर-
52 योगिनी गुप्ततरयोगी सर्वसंक्षोभिनी सर्वसंक्षोभनः
सर्वविद्राविणी सर्वविद्रावणः सर्वाकर्षिणी सर्वाकर्षणः
सर्वाह्लादिनी सर्वाह्लादनः सर्वस्तंभिनी सर्वस्तंभनः सर्वजृंभिणी

सर्वजृम्भणः सर्ववशंकरीसर्ववशंकरः सर्वरञ्जनीस
र्वरञ्जनः सर्वोन्मादिनीसर्वोन्मादनः सर्वसाधनीसर्व
साधनः सर्वसम्पत्तिपूरिणी सर्वसम्पत्तिपूरणः ॥
त्र्यश्रनाभसाः सर्वमन्त्रमयीसर्वमन्त्रमयः सर्वद्वंद्व
क्षयङ्करी सर्वद्वंद्वक्षयंकरः सर्वसौभाग्यप्रदायकचक्र-
स्वामिनीसर्वसौभाग्यप्रदायकचक्रस्वामी सम्प्रदाययो

सौ णी सर्वसिद्धिप्रदा सर्वसिद्धिप्रदः सर्वसम्पत्प्रदा सर्वस
टी म्पत्प्रदः सर्वप्रियङ्करी सर्वप्रियंकरः सर्वमंगलकारि
पर णी सर्वमंगलकारी सर्वकामप्रदा सर्वकामप्रदः
सर्वदुःखविमोचिनी सर्वदुःखविमोचनः सर्वमृत्युप्र
53 शमनी सर्वमृत्युप्रशमनः सर्वविघ्ननिवारिणी सर्व
विघ्ननिवारणः सर्वाङ्गसुन्दरी सर्वाङ्गसुन्दरः ॥

सर्वसौभाग्यदायिनी सर्वसौभाग्यदायी सर्वार्थसाध
कचक्रस्वामिनी सर्वार्थसाधक चक्रस्वामी ऊलकौ
लयोगिनी ऊलकौलयोगी सर्वज्ञासर्वज्ञः सर्वश
क्तिः सर्वशक्तिः सर्वैश्वर्यप्रदासर्वैश्वर्यप्रदः सर्वज्ञा
नमयी सर्वज्ञानमयः सर्वव्याधिविनाशिनी सर्वव्या
धिविनाशनः सर्वाधारस्वरूपासर्वाधारस्वरूपः स

सौ वैपापहरा सर्वपापहरः सर्वाऽनन्दमयी सर्वानन्दम
टी यः सर्वान्तरस्वरूपिणी सर्वान्तरस्वरूपी सर्वेप्सितफ
५४ लप्रदा सर्वेप्सितफलप्रदः सर्वरक्षाकरचक्रस्वामि
नी सर्वरक्षाकरचक्रस्वामी निगर्भयोगिनी निगर्भ-
54
योगी वशिनीवशी कामेश्वरी कामेश्वरः मोहिनी
मोही विमलाविमलः अरुणा अरुणः जयिनीजयी

सर्वेश्वरी सर्वेश्वरः कौलिनीकौली ॥ प्रथमानसा
मरीचयः ॥ सर्वरोगहरचक्रस्वामिनी सर्वरोगहरच
क्रस्वामी रहस्ययोगिनी रहस्ययोगी वाणिनीवा
णी चापिनीचापी पाशनीपाशी अङ्कुशिनी अं
कुशी महाकामेश्वरी महाकामेश्वरः महावज्रेश्वरी
महावज्रेश्वरः महाभगमालिनीमहाभगमाली म

सौ ह्रात्रिपुरसुन्दरी महात्रिपुरसुन्दरः सर्वसिद्धिप्रदच
टी क्रस्वामिनी सर्वसिद्धिप्रदचक्रस्वामी परापररहस्य
५५ योगिनीपरापररहस्ययोगी श्रीभट्टारिकाश्रीभट्टा
रकः सर्वानन्दचक्रस्वामिनी सर्वानन्दचक्रस्वामिनी
55
सर्वानन्दचक्रस्वामी परापरातिरहस्ययोगिनीपराप
रातिरहस्ययोगी त्रिपुरात्रिपुरः त्रिपुरेश्वरी त्रिपुरेश्वरः

त्रिपुरसुन्दरीत्रिपुरसुन्दरः त्रिपुरवासिनी त्रिपुरवा
सी त्रिपुरश्रीः त्रिपुरश्रीः त्रिपुरमालिनी त्रिपुरमा
ली त्रिपुरासिद्धिः त्रिपुरासिद्धः त्रिपुराम्बिका त्रिपुरा
म्बिकः महात्रिपुरसुन्दरी महात्रिपुरसुन्दरः महामं
हेश्वरी महामाहेश्वरः महामहाराज्ञी महामहारा
जः महामहाशक्तिः महामहाशक्तः महाशमा म

सौ॰ ह्लाश्मः महामहाश्मिः महामहाश्मः महामहा
टी नन्दी महानन्दः महास्पन्दा महास्पन्दः महामहाः
५८ शया महामहाशय इतिमानसाः इत्यनेनप्रकारे
णाथेमयूखावलिंश्चाउपरिसहस्रारेतवपादाम्बुयुगं
चक्रभुक्तात्मिकात्मयोर्मन्त्रस्तु श्रीमन्महा श्रीचक्र
नगरनामाज्ञाचक्र श्रीपादुकां पूजयामिनमइति

56

एवं शश्मिक्रमं कुर्वन्साधकोविजितेन्द्रियः धनधन्यायु
रारोग्ययपाण्डित्यादिपदंलभेत् एवं श्रीचक्रदेवीनाम
न्त्ययोगोनिवेदितइति फलश्रुतिः यत्तु आधाराद्
हिचक्रे अग्निसूर्यसोमावस्थानं अत्राग्नेरष्टोत्तरशतं
किरणाः षोडशोत्तरकिरणारवेः तितावुदकेवसं
न्ति षट्त्रिंशादधिकगभस्तयः सोमस्य नभसिमन

सौ स्मिच तदुक्तं भैरवयामले अष्टोत्तरशतैर्वक्रैः षोड°
टी शोत्तरकैरवैः षट्त्रिंशदुत्तरं तेजः सोमस्य परिकी
५° र्तितमिति व्याख्यातं अथ त्रिभिः श्लोकैर्वाग्भवेपास
57 नोपयुक्तं ध्यानादिकमुच्यते तत्र सात्त्विकं ध्यान°
माघेनाह ॥

शरज्ज्योत्स्नाशुभ्रां शशियुतजटाजूटमुकुटां ।

वरदाभयाक्षमालास्फटिकगुटिकापुस्तककरां सकलत्रला
नत्वाकथमपिसन्तांसन्निदधतेमधुतीरङ्गातामधुरि·
।मधुरीणाभणितयः १५ ॥

शरत्कालीनचन्द्रिकातु
विंशशिनायुतः शशियुतोजटाजूटोजटाबन्धः तन्मयं
मुकुटंचयस्यास्तांवरोवरमुद्राक्षमालाभयमुद्रास्फटि
कगुटिकास्फाटिकीमालापुस्तकंचकरेयस्यास्तां सकृदेक

सौ. वासमपि त्वां भवती नत्वा प्रणम्य सतां सज्जनानां भणित
टी. योवाचः कथं न सन्निदधते सन्निहिता भवन्ति न कथम
५८ पीत्यर्थः कीदृश्यो भणितयः मधुक्षीरद्राक्षामधुरिम
धुरीणाः मधुवत् माक्षिकवत् आवर्तितदुग्धवत्
द्राक्षावत् मृद्वीकावत् मधुनि मधुरीणासाधुर्यप्रवा
हा इत्यर्थः ॥ विषण्ण एतेष एवंभूतां सरस्वतीमं पि

58

पुनः सहृदयैरपि न ताम् सतां भणितयः कथं सन्निदधते इत्यर्थः ।
तेनैव राजसंध्यानमाह ॥ ये सन्तः कतिचित्कियन्तः ।

कवीन्द्राणां चेतःकमलवनबालातपरुचिं
भजन्ते ये सन्तः कतिचिदरुणामेव भवतीं
विरिंचिप्रेयस्यास्तरलतरशृंगारलहरी ग
भीराभिर्वाग्भिर्विदधति सतां रञ्जनममी १९

सौ
टी॰
५९

अरुणामेवभवतींभजन्ति अमीसन्तोवाग्भिस्सतां सहृ
दयाणांरञ्जनंविदधति भवतींकीदृशींकवीन्द्राणांव
र्णयितृश्रेष्ठानांचेतांस्येवकमलवनानि तत्रबालातपरु
चिरुद्यत्सूर्यकिरणानुकारिणीं तत्प्रकाशिकामित्य
र्थः वाग्भिःकीदृशीभिः विरिंचिप्रेयस्याःसरस्वत्याः
तरुणेनरागोज्ज्वलितायाश्शृङ्गाररसलहरीकामरसप्रवाहः

59

तद्द्रुभीराभिः शृङ्गार्थप्रतिपादकाभिः यथा सर्वस्वमा
कामोद्दीपको शृङ्गारस्तथा शृङ्गार्थाभिरित्यर्थः यद्वा अमीष
तां रञ्जनं सर्वस्वत्याश्च रञ्जनं विदधाति तत्तरङ्गतरङ्गां·
स्त्रीरूपाणां तरङ्गतरा समुद्रावायाश्चङ्गरलहरीष्
गारवसन्तवक्त्रः तयागंभीराभिरित्यर्थः विस्तृपतेभव
तित्वयिवदंके· विभ्रमाणां श्रीलक्ष्मीर्येभजन्ते इत्यर्थः

सौ
टी
१२

कवीन्द्राणामित्यादिलक्ष्मीविशेषणं शेषंसमानम् ॥

सावित्रीभिर्वाचां शशिमणिशिलाभंगरुचिभिः
वशिन्याद्याभिस्त्वां सहजननिसञ्चिन्तयतियः
सकर्त्ताकाव्यानां भवतिमहतांभङ्गिसुभगैः
वचोभिर्वाग्देवी वदनकमलामोदमधुरैः १७

हेजननिवाचां सावित्रीभिर्मातृकाभिःशशिम-

60

णिशिलाचन्द्रकान्तमणिपाषाणः नखभंगः भत्र
मानचन्द्रकान्तमणिरित्यर्थः वृद्धोभिहितइतिन्याया
त् नहद्वचिः कान्तिर्यासांताभिर्वशिन्याद्याभिः वशि
नीवशीकामेश्वरीमोहिनीविमला अरुणाजयिनी
सर्वेश्वरी कालिनीप्रभृतिः सहयत्त्वा संविन्नयति
समहतांकाव्यानांमहाकाव्यानांकर्ताभवति केवं

सो टी द्वी

चोभिः कीदृशैर्भङ्गिः सुभगैः नानाविधशब्दरचनावैदग्ध्यविशेषभंगयः ताभिः सुभगैः शोभनैः पुनः कीदृशैः वाग्देवीवदनकमलामोदमधुरैः सरस्वतीमुखपद्मसौरभवन्मधुरैर्हृद्यैरित्यर्थः॥ मध्यकूटोपयुक्तं

(द्वाभ्यां ध्यानादिकमाह

तनुच्छायाभिस्ते

तरुणतरणिश्रीसरणिभिः दिवं सर्वा

61

उर्वीमरुणिमनिमग्नां स्मरतियः भवन्त्यस्य त्रस्यद्वन
हरिणशालीननयनाः सहोर्वश्या वश्याः कति कति
न गीर्वाणगणिकाः १८ ॥

तरुणतरणि श्रीसरणिभिर्बालातपकांतिरूप्या
भूताभिस्त्वत्सदृशीभिरित्यर्थः तनुच्छायाभिः शरीर
कान्तिभिः करणभूताभिः सर्वां दिवमाकाशमुर्वीं

सौ र्वीमरुणिमनिमग्नांलोहितकान्तिकवलितां यः
टी स्मरति तस्यनाकवेश्याउर्वश्यासहकानिकतिवश्या
६२ नभवन्ति अपितुभवन्त्येव कीदृशोनाकवेश्यास्तस्य
62 न्तोविभ्रान्तोयेवनहरिणागहनहरिणागह्वरादिने
षुतेषुत्रासाभावात् तद्वच्छालीनंशोभमानंनयनंयासां
ताः अनिमिषदृष्टीनांसुरांगनानांकामनृपतयानयन

माहात्म्यवर्णनमुपपन्नं ॥ कामकलाध्यानमाह ॥

मुखंबिंदुंकृत्वा कुचयुगमधस्तस्यतदधो
हरार्धंध्यायेद्यो हरमहिषितेमन्मथकलां
ससद्यःसंक्षोभंनयतिवनिताइत्यतिलघु
त्रिलोकीमप्याशुभ्रमयतिरवीन्दुस्तनयुगां

मुखंविन्दुमिति विन्दुमेकमीकारोर्ध्वंवयववद्रूपंमुख

सौ टी ८४

63

तयाध्यात्वातस्यञ्जरवस्याथः ऊचङ्गंऊचश्रुगतयाति
न्हृदंपङ्कजत्वाध्यात्वा तदथः ऊचहृयाथः हराधमथोभु
एंत्रिकोणंयोध्यायेत् हेहरमहिषिमहेमपत्निनेन
वमन्मथकलांक्लींबीजस्य ईकारद्वपंस्वरंसर्वेनिता :
संतोभंनयतीतिफलमतिलज्ञ्यानितद्धं श्रतप
वाः पिकंफलमाह ॥

रवीन्द्रलनयुगंयस्यास्तां त्रिलोकीमपि यास्त्रपीठे
भ्रमयति सोभवतीत्यर्थः यत्तदेवोक्तं चतुःशत्या वि
न्दुसंकल्पवक्त्रं तु तदधः स्यात्कुचद्वयं तदधः सहरा
र्धं तु चिन्तयेत्तदधो मुखमिति तथाच विन्दोस्तु वक्त्र
मारोप्य तदधो वा कुचयुग्मकं तदधः कुचयुग्मं तु तद
धो योनिमेव चेति त्रिलोकीमपीत्यनेन नतस्या श्र

सौ
टी
६४

यिकामकलारूपत्वेनस्फुरंभवति तदुक्तं रुद्रयामले
तन्त्रे नभोमहाबिन्दुमुखी सूर्यचंद्रस्तनद्वया सुमे
रुहार्धकलयाशोभमानमहीयदा पातालतलदे
व्यापात्रिलोकीयं तवाऽम्बिके कामराजकलारूपा
जागर्तिसचराचरेति अत्रहरार्धपदेनाधोमुखत्रि
कोणात्मिकायोनिरुच्यते हशोहकारस्तुसर्वभागेहे

64

=

लोपादिकारककारेव्यत्ययेनसंहितां
प्राप्तो इतिवो

१धोभागोयोस्याकारस्तिष्ठति अथवा हवः शिवे
ति वर्णद्वयंतस्यार्थश्चाकारवकारयोर्लोपात्संहि
तायां पठतिरूपं यद्वा हवोहंसपदंहकारसकार
योर्लोपाद्विन्दुविसर्गाभ्यांविन्दुत्रयमवशिष्यते
तत्रैवयोजना अः इति स्वरूपंध्यायेत् केनप्रका
रेणविन्दुंहकारोपरिस्थंस्तुत्वंकृत्वा तस्यार्थोवि

सौ
टी
६५

65

सर्गात्मकं बिन्दुद्वयं ऊर्ध्वमुखं कृत्वा तदधो मन्मथ
कलां योनिं ध्यायेदित्यनुषङ्गः इत्येतत्कामकलारूप
मतिगोप्यं तदङ्कं सङ्केतपद्धतो एतत्कामकला
रूपमाति, ध्यानं गुह्याद्गुह्यतरं महत् नाशिष्यायप्रव
क्तव्यं नाभक्तायकदाचन एतत्प्रकाशनं मातृरू
ह्लाटनमुरोजयोः आकृष्याच्छादनमिव,

तस्मान्नैतत्प्रकाशयेत् लोभान्मोहाच्चरार्थाद्वा वेद
ष्याद्वा प्रकाशयेत् सोऽचिरेण मृत्युमाप्नोति शास्त्रद्वं
त विषादिभिरिति तृतीयवीजेनोपवृंहतध्यानमा
ह ॥

किरन्तीमङ्गेभ्यः किरणनिकुरम्बामृतरसं
हृदि त्वामाधत्ते हिमकरशिलामूर्तिमिव यः
स सर्पाणां दर्पं शमयति शकुन्ताधिप इव ।

सौ ज्वरप्लुष्टंदृष्ट्यासुखयतिसुधाधारसिरया २० ॥
टी यःसाधकस्त्वांहृद्याधत्ते शकुन्ताधिपोगरुडइव सर्पाणां
६६ दर्पंदृष्ट्याशमयति ज्वरप्लुष्टंतज्ज्वरदग्धंसुखयति त्वांकी
